# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2021

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। $2\times5 = 10$

(क) शुकनासोपदेशः कस्मात् ग्रन्थात् गृहीतः ? अस्य ग्रन्थस्य रचयिता कः ?

(ख) शुकनासः कस्मै किमुद्दिश्य उपदेशं दत्तवान् ?

(ग) वसुजननी का ? कथं सा वसुजननी उच्यते ?

(घ) शुकनासस्य उपदेशानुसारं बुद्धिः कदा कालुष्यमुपयाति ?

(ङ) 'कादम्बरी' शब्दस्य कोऽर्थः ? 'कादम्बरी' कीदृशः काव्यग्रन्थः ?

(च) शुकनासोपदेशे कः काम् अनार्य्याम् उवाच ?

(छ) 'अनर्थपरम्परा' इति पदेन किं बुध्यते ?

(ज) यौवनसमये यूनां दृष्टिः कथं भवति ?

2. अधोनिर्दिष्टेषु विषयेषु यथेच्छं द्वयम् आश्रित्य टीकां लिखत। $5\times2 = 10$

(क) गन्धर्वनगरलेखा, (ख) कुसुमशरः, (ग) व्यसनम्, (घ) राजलक्ष्मीः, (ङ) मृगतृष्णिका, (च) चन्द्रापीडः।

अथवा

अधोलिखितेषु पङ्क्तिद्वयं व्याख्येयम्। $5\times2 = 10$

(क) गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वम् अमानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ख) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कते। दर्शनप्रदानमपि अनुग्रहं गणयति। दृष्टिपातमप्युपकारपक्षे स्थापयन्ति।

(ग) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

## SECTION-B

3. कश्चिदेकः प्रश्नः समाधेयः। 10×1 = 10

(क) 'तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म' — कः कुत्र समाधौ तिष्ठति स्म ? तेन कदा समाधिः अङ्गीकृतः ? कथं स मृत्युं जितवान् ? 1+1+1+7

(ख) किं नाम ऐतिहासिककाव्यम् ? शिवराजविजयः ऐतिहासिकं काव्यं न वेति विचार्य्यताम्। 2+8

4. अधोलिखितेषु विषयेषु यथेच्छमेकम् अवलम्ब्य टीकां लिखत। 5×1 = 5

(क) सोमनाथतीर्थः।

(ख) विक्रमराज्यम्।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्यां लिखत। 5×1 = 5

(क) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य।

(ख) बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।

## SECTION-C

5. संस्कृतगद्यसाहित्येषु वाणभट्टस्य कृतिमाश्रित्य एकं प्रबन्धं लिखत। 10

अथवा

महाकवेः दण्डिनः रचनाशैली वर्ण्यताम्। 10

6. कमपि एकं विषयमाश्रित्य टीकां लिखत। 5×1 = 5

(क) वासवदत्ता, (ख) गद्यकाव्यम्।

अथवा

विषयमेकमवलम्ब्य व्याख्या कार्या। 5×1 = 5

(क) गद्यं कवीनां निकषं वदन्ति।

(ख) कादम्बरीरसज्ञानामाहारोऽपि न रोचते।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——